Reg. No. : ...................................

Name : .......................................

# FY-218

**FIRST YEAR HIGHER SECONDARY EXAMINATION, SEPTEMBER 2021**

Part – III

Time : 2½ Hours

**SANSKRIT SAHITHYA**

Cool-off time : 20 Minutes

**(Optional)**

Maximum : 80 Scores

*निर्देशा :*

- 20 निमेषाः समाश्वाससमयः । प्रश्नान् पठितुम् इच्छानुसारं चयितुम्, उत्तराणि क्रमीकर्तुं च अयं समयः उपयोक्तव्यः ।
- प्रश्नस्य निर्देशान् सश्रद्धं पठित्वा अवगत्य च उत्तराणि लेखनीयानि ।
- प्रश्नानाम् अङ्काः तत्र तत्र दत्ताः । उत्तरलेखनाय समयः अङ्काः च परिगणनीयः ।

*നിർദ്ദേശങ്ങൾ:*

- 20 മിനിറ്റ് സമാശ്വാസ സമയമാണ്. ഈ സമയം ചോദ്യങ്ങൾ വായിക്കാനതിനും ഇഷ്ടമുള്ളവ ചോദ്യങ്ങൾ തിരഞ്ഞെടുക്കുന്നതിനും ഉത്തരങ്ങൾ ആസൂത്രണം ചെയ്യാനും ഉപയോഗിക്കാം.
- ഓരോ ചോദ്യവുമായി ബന്ധപ്പെട്ട നിർദ്ദേശങ്ങൾ ശ്രദ്ധാപൂർവ്വം വായിച്ചു മനസിലാക്കിയ ശേഷം ഉത്തരമെഴുതുക.
- ഓരോ ചോദ്യത്തിനുമുള്ള സ്കോർ അതോടൊപ്പം നൽകിയിരിക്കുന്നു. ഉത്തരമെഴുതുമ്പോൾ സമയവും സ്കോറും പരിഗണിക്കണം.

**I. 1-8 प्रत्येकस्य प्रश्नस्य एकैकः अङ्कः ।**

**1 മുതൽ 8 വരെയുള്ള ചോദ്യങ്ങൾക്ക് 1 സ്കോർ വിതം. (8 × 1 = 8)**

(1) स्वप्नवासवदत्तस्य कर्ता कः ?

(व्यासः, भासः, रामपाणिवादः)

(2) कः सर्वत्र पूज्यते ?

(विद्वान्, पामरः, धनिकः)

(3) 'बुद्धिरेव गरीयसी' नाम पाठं कस्मात् स्वीकृतम् ?

(रामायणात्, नारयणीयात्, पञ्चतन्त्रात्)

(4) 'वसुधैव कुटुम्बकम्' इति केषां चिन्ता भवति ?

(उदारचरितानाम्, लघुचेतसाम्, सन्तुष्टचित्तानाम्)

(5) मारुतात्मजः कः ?

(बालिः, हनुमान्, सुग्रीवः)

(6) रामायणे कति काण्डाः सन्ति ?

(सप्त, अष्ट, नव)

(7) केरलोदयस्य कर्ता कः ?

(भासः, शक्तिभद्रः, डा. के.एन्. एषुत्तच्छन्)

(8) 'विश्वभानुः' नाम महाकाव्ये कस्य चरितम् उपवर्णितम् ?

(नारायणस्य, विवेकानन्दस्य, श्रीरामकृष्णपरमहंसस्य)

II. **9-16 प्रत्येकस्य प्रश्नस्य अङ्कद्वयम् ।**

**9 മുതൽ 16 വരെയുള്ള ചോദ്യങ്ങൾക്ക് 2 സ്കോർ വിതം.** **(4 × 2 = 8)**

प्रदत्तेषु चतुर्णाम् उत्तराणि लिखत ।

തന്നിരിക്കുന്നവയിൽ നിന്നും നാല് ചോദ്യങ്ങൾക്ക് ഉത്തരമെഴുതുക.

(9) उदाहरणानुसारं पदच्छेदं लिखत ।

उदा : तथैव → तथा + एव ।

यथैव → ______ + ______ ।

उदा : सापि → सा + अपि ।

कापि → ______ + ______ ।

(10) एकपदं लिखत ।

(1) भुवः पतिः ।

(2) अन्यो देशः ।

(11) पूरयत ।

(1) बुद्धिरेव ______ ।

(2) वसुधैव ______ ।

(12) उदाहरणानुसारं सन्धत्त ।

उदा : दशरथ: + नाम → दशरथो नाम ।

रामः + नाम → ______ ।

उदा : लक्ष्मण: + च → लक्ष्मणश्च ।

भरतः + च → ______ ।

(13) कोष्ठकात् मेलपुत्तूर, नारायणभट्टपादस्य ग्रन्थद्वयं चित्वा लिखत ।

[नारायणीयम्, मुकुन्दमाला, धातुकाव्यम्, केरलोदयम् ]

(14) प्रदत्तेषु महाभारतकथाम् आधारीकृत्य लिखिते नाटके चित्वा लिखत ।

[ चारुदत्तम्, दूतवाक्यम्, स्वप्नवासवदत्तम्, प्रतिमानाटकम्, कर्णभारम् ]

(15) उदाहरणं पठित्वा अलङ्कारलक्षणं लिखत ।

उदा : मदेन भाति कलभः प्रतापेन महीपतिः ।

(16) कोष्ठकात् गणनाम चित्वा लिखत ।

[ नगणः, मगणः, सगणः, जगणः ]

(1) नमति ।

(2) जगाम ।

**III. 17- 23 प्रत्येकस्य प्रश्नस्य अङ्कत्रयम् ।**

**17 മുതൽ 23 വരെയുള്ള ചോദ്യങ്ങൾക്ക് 3 സ്കോർ വീതം.** **(3 × 3 = 9)**

प्रदत्तेषु प्रश्नेषु **त्रयाणां** प्रश्नानाम् उत्तराणि लिखत ।

തന്നിരിക്കുന്നവയിൽ നിന്നും മൂന്നു ചോദ്യങ്ങൾക്ക് ഉത്തരമെഴുതുക.

(17) अधः प्रदत्तं श्लोकं पठित्वा रेखाङ्कितपदानां स्थाने पेटिकातः समानार्थकपदानि चित्वा लिखत ।

| | | |
|---|---|---|
| सज्जनाः | प्रकाशयति | त्यजति |

पापान्निवारयति योजयते हिताय

गुह्यं निगूहति गुणान् प्रकटीकरोति ।

आपद्गतं च न जहाति ददाति काले

सन्मित्रलक्षणमिदं प्रवदन्ति सन्तः ।।

(18) श्लोकपादान् समानार्थकेन आशयेन सह योजयत ।

| क | ख |
|---|---|
| मूढाः परप्रत्ययनेयबुद्धिः । | यागस्य दानस्य च फलं सर्वदा तिष्ठति । |
| हुतं च दत्तं च तथैव तिष्ठति । | प्राणी यदा केनापि कारणेन क्रुद्धो भवति तदा स्वकीयं स्वभावं प्रकटीकरोति । |
| कोपात् प्रतिपद्यते हि जन्तुः । | अविवेकिनः तु अन्यैः नीयमानया बुद्ध्या जीवनं कुर्वन्ति |

(19) अधः प्रदत्तं गद्यभागं पठित्वा क्त्वान्त – ल्यबन्त तुमुन्नन्तपदानि चित्वा लिखत ।

ब्राह्मणपण्डिताः एकत्र मिलित्वा भाविकार्यं प्रति विचिन्त्य पूर्वदेशं प्रति गन्तुं निश्चयमकरोत् ।

(1) क्त्वान्तम्

(2) ल्यबन्तम्

(3) तुमुन्नन्तम्

(20) कोष्ठके दत्तानि पदान्युपयुज्य संभाषणांशान् पूरयत ।

[ भीरुः, व्यापादयिष्यति, सिंहस्य ]

सुबुद्धिः – भो सोदराः तत् ______ अस्थिपञ्जरं भवति ।

ज्येष्ठः – भो ______ त्वं गृहं गच्छतु ।

सुबुद्धिः – यदि एनं सजीवं करिष्यसि ततः सर्वानपि ______ ।

तृतीयः – धिङ्मूर्खः नाहं विद्यां विफलां करोमि ।

(21) अधः प्रदत्तं श्लोकं पठित्वा प्रश्नानाम् उत्तराणि लिखत ।

तस्यास्तद्, वचनं श्रुत्वा हनुमान् हरिपुङ्गवः ।

दुःखादुःखाभिभूतायाः सान्त्वमुत्तरमब्रवीत् ।।

(1) अधोरेखाङ्कितस्य पदस्य पदच्छेदं लिखत ।

(2) हरिपुङ्गवः कः ?

(3) निशम्य – समानार्थकपदं लिखत ।

(22) संस्कृतभाषया अनुवदत ।

(1) ആധുനിക കേരളീയ സംസ്കൃതകവിയാണ് രാമപാണിവാദർ.

(2) ആധുനിക സംസ്കൃത കാവ്യങ്ങളിൽ പ്രമുഖമാണ് കേരളോദയം.

(3) നാരായണീയത്തിന്റെ കർത്താവ് മേല്പുത്തൂർ നാരായണഭട്ടൻ ആകുന്നു.

(23) उदाहरणानुसारं वाक्यं परिवर्त्य लिखत ।

उदा : रामः पठति स्म । → रामः अपठत् ।

(1) सीता लिखति स्म । → ______ ।

(2) कृष्णः गायति स्म । → ______ ।

(3) बालिका नृत्यति स्म । → ______ ।

**IV. 24 - 30 प्रत्येकस्य प्रश्नस्य चत्वारः अङ्काः ।**

**24 മുതൽ 30 വരെയുള്ള ചോദ്യങ്ങൾക്ക് 4 സ്കോർ വീതം.** **(3 × 4 = 12)**

प्रदत्तेषु प्रश्नेषु **त्रयाणाम्** उत्तराणि लिखत ।

തന്നിരിക്കുന്നവയിൽ നിന്നും മൂന്നെണ്ണത്തിന് ഉത്തരമെഴുതുക.

(24) अधः प्रदत्तं श्लोकं पठित्वा सन्मित्रलक्षणमधिकृत्य एकां टीकां लिखत ।

पापन्निवारयति योजयते हिताय
गुह्यं निगूहति गुणान् प्रकटीकरोति ।
आपद्गतं च न जहाति ददाति काले
सन्मित्रलक्षणमिदं प्रवदन्ति सन्तः ।।

(25) अधः प्रदत्तं श्लोकं पठित्वा गद्यक्रमं पूरयत ।

गुणानां वा विशालानां सत्काराणां च नित्यशः ।
कर्तारः सुलभा लोके विज्ञातारस्तु दुर्लभाः ।।

लोके ______ गुणानां ______ च कर्तारः ______ सुलभाः (तु) ______ दुर्लभाः ।

(26) अधः प्रदत्तं पेटिकात्रयं पठित्वा सार्थकानि चत्वारि वाक्यानि लिखत ।

| 1 | 2 | 3 |
|---|---|---|
| चत्वारो ब्राह्मणपुत्राः | देशान्तरं | सिंहस्यास्थीनि सञ्चिनोति । |
| तेषु त्रयः | मार्गमध्ये दृष्टानि | आसन् । |
| एकदा ते | मित्रभावमुपगताः | वसन्ति स्म । |
| ते | शास्त्रपारंगताः | गताः । |

(27) प्रदत्तां सूचनां पठित्वा रामायणम् अधिकृत्य एकां टिप्पणीं लिखत ।

**सूचनाः –**

आदिकाव्यम् ।

वाल्मीकिः ।

सप्तकाण्डाः ।

रामस्य अयनम् ।

(28) अधः प्रदत्तं जीवनचरितरूपरेखां पठित्वा डॉ. के.एन्. एषुत्तच्छन् अधिकृत्य एकां टिप्पणीं लिखत ।

| | | |
|---|---|---|
| नाम | – | डॉ. के.एन्. एषुत्तच्छन् |
| जीवनकालः | – | 1911 – 1981 |
| जन्मदेशः | – | पट्टाम्पि |
| औद्योगिकरंगः | – | साहित्यम् |
| प्रमुखकृतिः | – | केरलोदयम् |
| सविशेषता | – | संस्कृतपण्डितः, भाषाशास्त्रज्ञः इतिहासज्ञः च । |

(29) अधः प्रदत्तं श्लोकं पठित्वा विविधेषु सन्दर्भेषु गोरसशब्दस्य अर्थान् लिखत ।

विना गोरसं को रसो भोजनानां
विना गोरसं को रसो भूपतीनाम् ।
विना गोरसं को रसः कामिनीनां
विना गोरसं को रसः पण्डितानाम् ।।

(30) सूचनां पठित्वा डा. पि.के. नारायणपिल्ला महोदय–मधिकृत्य टिप्पणीं लिखत ।

**सूचनाः –**

आधुनिकसंस्कृतकविः, विश्वभानुः, धर्मसागरः, कालिदाससम्मानेन पुरस्कृतः, केरल–साहित्य–अक्कादमीपुरस्कारः ।

V. 31-37 प्रत्येकस्य प्रश्नस्य पञ्च अङ्काः ।

**31 മുതൽ 37 വരെയുള്ള ചോദ്യങ്ങൾക്ക് 5 സ്കോർ വിതം.** **(3 × 5 = 15)**

प्रदत्तेषु **त्रयाणां** प्रश्नानाम् उत्तराणि लिखत ।

തന്നിരിക്കുന്നവയിൽ മൂന്നെണ്ണത്തിന് ഉത്തരമെഴുതുക.

(31) प्रदत्तं श्लोकं पठित्वा आशयं लिखत ।

पुराणमित्येव न साधु सर्वं
न चापि काव्यं नवमित्यवद्यम् ।
सन्तः परीक्ष्यान्यतरद् भजन्ते
मूढः परप्रत्ययनेयबुद्धिः ।।

(32) अधः प्रदत्तं गद्यभागं पठित्वा प्रादेशिकभाषया अनुवदत ।

कस्मिंश्चिद् अधिष्ठाने चत्वारो ब्राह्मणपुत्राः परस्परं मित्रभावमुपगतः वसन्ति स्म । तेषु त्रयः शास्त्रपारंगताः परन्तु प्रायोगिकबुद्धिरहिताः । एकस्तु बुद्धिमान् केवलं शास्त्रपराङ्मुखः । अथ तैः कदाचित् मित्रैः मन्त्रितं "को गुणा विद्यायाः येन देशान्तरं गत्वा भूपतीन् परितोष्य अर्थोपार्जनं न क्रियते ? तत् पूर्वदेशं गच्छामः इति" ।

(33) अधः प्रदत्तं श्लोकं पठित्वा हनुमता दृष्टां सीतां अधिकृत्य **एकां** टिप्पणीं लिखत ।

(क) दुःखेन बुबुधे सीतां हनुमाननलंकृताम् ।
संस्कारेण यथा हीनां वाचमर्थान्तरं गताम् ।

(ख) सा निःश्वसन्ती शोकार्ता कोपोपहतचेतना ।
आर्ता व्यसृजदश्रूणि मैथिली विललाप च ।।

(34) ग्रन्थं ग्रन्थकारेण सह योजयत ।

| | | |
|---|---|---|
| रामपाणिवादः | – | केरलोदयम् । |
| शक्तिभद्रः | – | नारायणीयम् । |
| डॉ. के.एन्. एषुत्तच्छन् | – | सुभद्राधनञ्जयम् । |
| नारायणभट्टपादः | – | विष्णुविलासः । |
| कुलशेखरः | – | आश्चर्यचूडामणिः । |

(35) अधः प्रदत्तं गद्यभागं पठित्वा शक्तिभद्रस्य जीवनचरितरूपरेखा (Profile) पूरयत ।

शक्तिभद्रः केरले 'कुन्नत्तूर्' देशे 'कोड्डुमण्' ग्रामे अष्टमे शतके जनिमलभत । तस्य प्रमुखः कृतिः भवति आश्चर्यचूडामणिः । सः भुवनभूतिः नाम पुरस्कारेण समादृतः । आश्चर्यचूडामणिनाटकं अद्भुतरसप्रधानं भवति ।

नाम ____________________

जीवनकाल: ____________________

जन्मदेशः ____________________

प्रमुखः कृतिः ____________________

पुरस्कारः ____________________

(36) उपमालङ्कारं सलक्षणं विशदयत ।

(37) वृत्तं गणव्यवस्थां प्रति योजयत ।

| | | |
|---|---|---|
| तौ जगौ गः | – | उपेन्द्रवज्रा । |
| जतजास्ततो गौः | – | द्रुतविलम्बितम् । |
| तभजा जगौ गः | – | तोटकम् । |
| सैः कथितं | – | इन्द्रवज्रा । |
| नभौ भरौ | – | वसन्ततिलका । |

**VI. 38-43 प्रत्येकस्य प्रश्नस्य षट् अङ्काः ।**

**38 മുതൽ 43 വരെയുള്ള ചോദ്യങ്ങൾക്ക് 6 സ്കോർ വീതം.** **(3 × 6 = 18)**

प्रदत्तेषु **त्रयाणां** प्रश्नानाम् उत्तराणि लिखत ।

തന്നിരിക്കുന്നവയിൽ മൂന്നെണ്ണത്തിന് ഉത്തരമെഴുതുക.

(38) अधः प्रदत्तान् श्लोकान् पठित्वा इष्टतमश्लोकं सकारणं लिखत ।

(क) शिक्षा क्षयं गच्छति कालपर्ययात्
सुबद्धमूला निपतन्ति पादपाः ।
जलं जलस्थानगतं च शुष्यति
हुतं च दत्तं च तथैव तिष्ठति ।।

(ख) विद्वत्वं च नृपत्वं च नैव तुल्यं कदाचन ।
स्वदेशे पूज्यते राजा विद्वान् सर्वत्र पूज्यते ।

(ग) गुणानां वा विशालानां सत्काराणां च नित्यशः ।
कर्तारः सुलभा लोके विज्ञातारस्तु दुर्लभाः ।।

(39) अधः प्रदत्तं कथास्तम्भं क्रमीकृत्य लिखत ।

(1) ते पण्डिताः शास्त्रविज्ञानेन सिंहाय सजीवत्वं ददाति ।

(2) एकदा ते देशान्तरं गताः ।

(3) चत्वारो ब्राह्मणपुत्राः मित्रभावमुपगताः भवन्ति स्म ।

(4) एकः शास्त्रपराङ्मुखः किन्तु बुद्धिमान् चाभवत् ।

(5) ते मार्गमध्ये दृष्टं सिंहस्यास्थीनि सञ्चिन्वन्ति ।

(6) तेषु त्रयः शास्त्रपारंगताः किन्तु प्रायोगिकबुद्धिरहितः चाभवन् ।

(40) अधः प्रदत्तं गद्यभागं पठित्वा प्रश्नानामुत्तराणि लिखत ।

एकस्मिन्नधिष्ठाने चत्वारो ब्राह्मणपुत्राः परस्परं मित्रभावमुपगताः वसन्ति स्म । तेषु त्रयः शास्त्रपारंगताः किन्तु प्रायोगिकबुद्धिरहिताः भवन्ति । एकस्तु बुद्धिमान् केवलं शास्त्रपराङ्मुखः । गुरुकुलवासानन्तरं ते देशान्तरं गताः । तेषां मार्गमध्ये एका अटवी आसीत् । तत्र कानिचित् अस्थीनि दृष्टानि । पण्डितंमन्यमानाः त्रयः अस्य मृतसत्वस्य अस्थिसञ्चयमकरोत् । अथ तैः मन्त्रविद्यया एकः सिंहः निष्पाद्यते । सजीवं प्राप्तेन सिंहेन ते त्रयोऽपि व्यापादिताः ।

(1) ब्राह्मणपुत्राः कीदृशं भावमुपगताः वसन्ति स्म ?

(2) कति ब्राह्मणपुत्राः मित्रभावमुपगताः वसन्ति स्म ?

(3) तेषु त्रयःकीदृशमासीत् ?

(4) सजीवं प्राप्तेन सिंहेन किमाचरितम् ?

(5) तेषां मार्गमध्ये किमासीत् ?

(6) गुरुकुलवासानन्तरं ते कुत्र गताः ?

(41) प्रदत्तं गद्यभागं पठित्वा संगृह्य लिखत ।

प्राचीनकालादारभ्यैव केरलेषु अनेके संस्कृत-साहित्यप्रमुखाः संस्कृतशास्त्रज्ञाः च आसन् । कुलशेखरशक्तिभद्रादयः नाटककाराः श्रीशङ्कर भगवत्पादप्रभृतयः वेदान्तप्रस्थानस्थापकाः काव्यकाराश्च शङ्करकविप्रभृतयः साहित्यकुशलाः च इमां केरलधरणीम् अभूषयन् ।

केरलीयसंस्कृतमहाकविषु अन्यतमो भवति रामपाणिवादः । पालक्काट् जनपदे किल्लिक्कुरिश्शिमङ्गलं नामके ग्रामे क्रिस्त्वब्दस्य षोडशशतकस्यान्तिमे अयं लब्धजन्माऽभूत् । कैरलीसाहित्ये प्रसिद्धः 'कुञ्चन् नम्प्यार्' रामपाणिवादः एव इति केचिद् अभिप्रयन्ति । रामपाणिवादस्य रचनासु राघवीयं विष्णुविलासः इति महाकाव्यद्वयं, चन्द्रिका, लीलावती इति वीथीद्वयं, शारिकासन्देशः, आख्यायिकापद्धतिः प्राकृतवृत्तिः इति व्याकरणग्रन्थौ, गीतरामं पञ्चपदी इति गीतिकाव्ये, वृत्तवार्तिकं तालप्रस्तारः श्रीकृष्णविलासकाव्यस्य विलासिनी व्याख्या च अन्तर्भवन्ति ।

एवं केरलीयसंस्कृतमण्डले रामपाणिवादस्य योगदानं अनुपमं वर्तते । तस्य कृतयः इदानीमपि साहित्यविचारमण्डले प्रमुखं स्थानं आवहन्ति । तस्य श्रीकृष्णविलासकाव्यस्य व्याख्या केरलीयसंस्कृतशिक्षामण्डले बहूपकारकं भवति ।

(42) सूचनानुसारं कविं काव्यं च अधिकृत्य टिप्पणीं लिखत ।

**सूचना** : भासः, बालचरितम्, कृष्णस्य बाल्यकालम् ।

(43) प्रदत्तं श्लोकं पठित्वा अन्वयम् आशयं च लिखत ।

सन्दिग्ध्य मोहाद्वसुदेववाक्यं
मया प्रमाणीकृतभूतवाचा ।
हता नृशंसेन सुता भगिन्याः
तेनाविलं मे हृदयं यशोऽपि ।।

**VII. 44 - 45 प्रत्येकस्य प्रश्नस्य दश अङ्काः ।**

**44 മുതൽ 45 വരെയുള്ള ചോദ്യങ്ങൾക്ക് 10 സ്കോർ വീതം.** **(1 × 10 = 10)**

प्रदत्तयोः प्रश्नयोः **एकस्य** उत्तरं लिखत ।

തന്നിരിക്കുന്നവയിൽ ഒരെണ്ണത്തിന് ഉത്തരമെഴുതുക.

(44) हनुमत्सीतासमागमं तयोः सम्भाषणं च स्ववाक्यैः लिखत ।

**सूचनाः –**

मलिनसंवीता सीता, रामसन्देशसमर्पणम्, द्रुमाश्रितः कपिः, द्वौ मासौ जीवितानुग्रहः, कल्याणी गाथा ।

(45) कंसस्य आमन्त्रणवचनान्याधिकृत्य लघूपन्यासं लिखत ।

**सूचनाः –**

आलोचनायोगं, वसुदेववाक्यं, दिव्यरूपं प्राप्ता सुता, नारदस्य वचः, देवानां शक्तिः, विष्णोः पराक्रमत्वम् ।